# Kailasavarnanam 6

# કૈલાસવર્ણનમ્ ૬

## Document Information

Text title : Kailasavarnanam 6

File name : kailAsavarNanam6.itx

Category : shiva, shivarahasya

Location : doc_shiva

Transliterated by : Ruma Dewan

Proofread by : Ruma Dewan

Description/comments : shrIshivarahasyam | mAheshvarAkhyaH prathamAMshaH | adhyAyaH 26 - kailAsavarNane vRiSha(kRita)stutiH | 60-84||

Latest update : December 17, 2023

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

December 20, 2023

*sanskritdocuments.org*

# કૈલાસવર્ણનમ્ ૬

(કૈલાસશૈલે દેવીપ્રસ્તાવવર્ણનમ્ ૬)

સ્કન્દઃ -
મણિક્લૃપ્તે મહાપીઠે સંસ્થિતા મુગ્ધદર્શના ।
લાવકાનાં મયૂરાણાં કુક્કુટાનાં મનોહરમ્ ॥ ૬૦॥

મેષસારઙ્ગશૃઙ્ગોદ્યત્સ્ફારનારાવિદિક્તટમ્ ।
રમ્યં રત્નાબ્જિનીતીરં બદ્ધૈર્દિક્ષુ મણીન્દ્રકૈઃ ॥ ૬૧॥

સોપાનતીરસઙ્ક્લૃપ્તમણિસુન્દરમણ્ડપે ।
રત્નપઞ્જરમધ્યસ્થાન્રત્નશારીશુકાઞ્છિવા ॥ ૬૨॥

પશ્યન્તી દાડિમીબીજં દદાતિ શુકવક્ત્રકે ।
પૂગદ્રુવેષ્ટિતાપારદ્રાક્ષાવલ્લીસુગુચ્છકે ॥ ૬૩॥

સન્ધ્યાવલ્લીસુમારક્તચન્દ્રિકાપુષ્પશોભિતે ।
પર્યન્તકુલ્યાતીરાચ્છમણિબન્ધસુધાપયઃ ॥ ૬૪॥

પયોજવિકસત્ફુલ્લહલ્લકામોદમોદિતે ।
ધારાસારમહાયન્ત્રશોભિતે ગન્ધમોદિતે ॥ ૬૫॥

પૂગદ્રુમૌલિસઞ્છાદિમણિહર્મ્યોરુમઞ્ચગા ।
ક્રીડાશિખણ્ડિવિહિતતાણ્ડવં પશ્યતી શિવા ॥ ૬૬॥

મહામણીન્દ્રસઙ્ક્લૃપ્ત સૌધૈરૂપરિકલ્પિતે ।
નાનાચિત્રપટીક્લૃપ્તપટામ્બરગૃહાદરા ॥ ૬૭॥

તિરસ્કરણિકાક્લૃપ્તચતુર્દિક્ષ્વ મનોહરે ।
મણિકુમ્ભોદ્યતે દેવી મણિસ્તમ્ભવિભૂષિતે ॥ ૬૮॥

સખીભિસ્સહ સલ્લાપં કુર્વન્તી સંસ્થિતા ક્વચિત્ ।
રથાકારમહાસૌધૈર્મણિચક્રૈર્હયૈસ્તથા ॥ ૬૯॥

પર્યન્તૈવ તત્સૌધે સિહ્મહંસવિરાજિતે ।
તત્રૈવાન્તર્ગૃહે દેવ્યાઃ ક્રીડાભવનમીશિતુઃ ॥ ૭૦॥

શ્રીચક્રાકારમતુલં તન્મણીન્દ્રમનોહરમ્ ।
સહસ્રયોજનાયામં મણિચિત્રગવાક્ષકૈઃ ॥ ૭૧॥

હંસપદ્મમહાવ્યાલિપાલીચિત્રૈર્વિચિત્રિતે ।
મણિસ્તમ્ભમહાસારધારારઞ્જિતભૂતલૈઃ ॥ ૭૨॥

વિતાનમાલાકલિતૈર્મુક્તાગુચ્છાલિલમ્બિતૈઃ ।
મણિમઞ્ચૈર્મહાપાદૈર્લમ્બિતાધસ્થિતૈરપિ ॥ ૭૩॥

તેષૂધ્તા મહાશય્યાસ્સોપધાનમનોહરાઃ ।
ચન્દ્રમણ્ડલસઙ્કાશાઃ ફેનગોક્ષીરસપ્રભાઃ ॥ ૭૪॥

સુમામોદિતગન્ધાઢ્યા મલ્લિકાપુષ્પસંસ્તૃતાઃ ।
ભ્રમદ્દીપગૃહભ્રાજન્મણિચિત્રવિભૂષિતાઃ ॥ ૭૫॥

દેવસ્ય દેવ્યાઃ ક્રીડાદિરસચિત્રોરુકુટ્ટિમાઃ ।
ધૂપવૃક્ષૈર્દીપવૃક્ષૈર્મણિકૢમૈસ્સહસ્રશઃ ॥ ૭૬॥

તામ્બૂલકલ્પપાત્તરૈશ્ચ મણિભૃઙ્ગાકૈશ્શુભઃ ।
ધૂપપપાત્રૈર્દીપપાત્રૈઃ પુષ્પતામ્બૂલપાત્રકૈઃ ॥ ૭૭॥

ફલપૂર્ણૈઃ રત્નપાત્રૈર્મણિકુમ્ભૈસ્ભુધાયુતૈઃ ।
ધૂપામોદમણિદ્યોતિવિરાજિતમનુત્તમમ્ ॥ ૭૮॥

મણિપુત્તલિકાકૢમચારુચામરવીજનૈઃ ।
વ્યજનાદર્શતામ્બૂલધૃતપુત્તલિકાયુતૈઃ ॥ ૭૯॥

ગણૈશ્ચ રહિતો દેવસ્સખીવિરહિતા શિવા ।
તસ્મિઞ્છ્રીચક્રસૌધે(ચક્રમધ્ય) તુ ક્રીડતસ્તૌ શિવૌ મુને ॥ ૮૦॥

કૈલાસે નવશક્તિરત્નવિલસત્પીઠે મહાતત્ત્વવા-
ઞ્જાતે નૈકગકોટિવિસ્તરયુતે શ્રીચક્રમધ્યઙ્ગતે ।
બિન્દૌ ચન્દ્રદિનેશકોટિયુગલે મઞ્ચે ચ તત્પીઠકે
પઞ્ચબ્રહ્મમયે વયં ગિરિજયા સાર્ધં હૃદાદધ્મહે ॥ ૮૧॥

કૈલાસે નવરત્નહર્મ્યવિલસન્મઞ્ચે સુધાપાન્નિધૌ (સુધામ્ભોનિધેર્મધ્યે)
કાઞ્ચદ્રન(કલ્પ)કવાટિકાપરિવૃતે ચિન્તામણીભાયુતે ।

સાર્દ્ધં યો જગદમ્બયા રવિમયં ચૈકં સુધાવર્ષ્મણો
રૂપં કન્તુકમુત્ક્ષિપત્યનુદિનં તેનૈવ રાત્રિન્દિવમ્ ॥ ૮૨॥

મૂર્તીર્યો વિધિવિષ્ણુરુદ્રસુરરાડષ્ટૌ પુમર્થાનપિ
ચત્વાર્યેવ યુગાનિ વેદનિવહં દિવ્યં કલાનાં ગણમ્ ।
કુર્વન્નેવ ચતુર્દિશાત્મકમઠાવૈચિત્ર્યપીઠે સદા
દીવ્યન્ત્સાર્ધમશેષભાગ્યનિવહૈઃ કૃત્વા ગૃહં સમ્મતમ્ ॥ ૮૩॥

કૃત્સ્નપ્રાણિકલાપરમ્ય ફલકસ્તોમં વિધાયાત્ર વૈ
કાલં કર્મ ચ પાશકં સહિ શિવો દીવ્યન્ત્સહાસ્તેઽમ્બયા ॥ ૮૪॥

દેવીપ્રસ્તાવવર્ણનમ્

॥ ઇતિ શિવરહસ્યાન્તર્ગતે માહેશ્વરાખ્યે કૈલાસશૈલે વૃષગોપુરવર્ણનમ્ ॥

- ॥ શ્રીશિવરહસ્યમ્ । માહેશ્વરાખ્યઃ પ્રથમાંશઃ । અધ્યાયઃ ૨૬ - કૈલાસવર્ણને વૃષ(કૃત)સ્તુતિઃ । ૬૦-૮૪॥

- .. shrIshivarahasyam . mAheshvarAkhyaH prathamAMshaH . adhyAyaH 26 - kailAsavarNane vRRiSha(kRRita)stutiH . 60-84..

Notes:
Skanda સ્કન્દ describes about the grand residence of Devī દેવી Mount Kailāsa કૈલાસ શૈલ, and mentions about the Śrīcakra શ્રીચક્ર - in the center of which She sports with Śiva શિવ.
Śivarahasyam Aṃśaḥ-1 (Māheśvarākhya) શિવરહસ્યમ્ અંશઃ-૧ (માહેશ્વરાખ્ય) has several descriptions about Mount Kailāsa કૈલાસ શૈલ and Śiva શિવ. Selected verses from some of the chapters are presented here.

Encoded and proofread by Ruma Dewan

*Kailasavarnanam 6*

pdf was typeset on December 20, 2023

Please send corrections to *sanskrit@cheerful.com*